# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (सत्रम्-३) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
| विषयः -फलितज्योतिषम् (ऐच्छिकम्) | (C.E.- ५.३.३. OLD ) | समयः -३.०० तः ६.०० |
| दिनाङ्कः - १४/१०/२०१९ | सन्दर्भग्रन्थः - सरलजन्मपत्रीविज्ञानम् । | |

### प्रथमान्वितिः

**प्रश्नः १ अधोलिखितयोः एकस्य सान्वयं व्याख्यां कुरुत । ०५**

(१) बुधः करोति विख्यानं साध्वीपत्नीपतिं शुभम् ।
जीवः करोति निर्धनं तेजस्विनमनिन्दितम् ॥

(२) ग्रहः क्रूरो व्ययाधीशो धर्मारि सहजे व्यये ।
भृतौ शिखी सुतस्थाने जातको म्रियते ध्रुवम् ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं निबन्धयत । १०**

(१) सूर्यदशन्तर्दशाफलम् ।

(२) सहजभावविचारः ।

### द्वितीयान्वितिः

**प्रश्नः ३ अधोलिखितयोः एकस्य सान्वयं व्याख्यां कुरुत । ०५**

(१) षष्ठे च भवने भौमः सप्तमे सिंहिकासुतः ।
अष्टमे च यदा सौरिर्भार्या तस्य न जीवति ।

(२) शुक्रो दशसहस्राणि बुधो दशशतानि च ।
लक्षमेकं तु दोषाणां गुरुर्लग्ने व्यपोहति ॥

**प्रश्नः ४ अधोलिखितेषु प्रश्नेषु कमप्येकं प्रश्नं सविस्तरं विवेचयत । १०**

(१) अवस्थाकृत ग्रहफलम् ।

(२) राजयोगफलम् ।

### तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु । ०५**

(१) कामेश्वरे कर्मगते स्वतुङ्गो कर्माधिपे भाग्यपसंयुते च ।
श्रीनाथयोगः शुभदस्तदानीं जातो नरः शक्रसमो नृपालः ।.

(२) केन्द्रस्थिते देवगुरौमृगाङ्काद्योगस्तदाहुर्गजकेसरीति ।
दृष्टे सिताचेन्दुसुतैः शशाङ्के नीचास्तहीनैर्गजकेसरीस्यात् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **१०**

(१) भद्रयोगफलम्।

(२) केमद्रुमभङ्गयोगः।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य उपरि व्याख्यां करोतु।** **०५**

(१) जलेनाऽष्टादशे वर्षे सूर्येण नवमे पुनः।
ज्वरेण दशमे चैव द्वात्रिंशे राजयक्ष्मजा॥

(२) चन्द्रर्क्षपे मुथशिलं येनाऽसावब्दपोऽस्य चेत्।
कम्बूलमिन्दुना जन्मनिशि वर्षं तदोत्तमम्॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु।** **१०**

(१) वर्षेश–सूर्यफलम्।

(२) मुंथादृष्टिफलम्।

## संयुक्तान्वितिः

**प्रश्नः ९ अधोलिखितेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु।** **१०**

(१) के षड्वर्गाः ?

(२) द्रेष्काणे कति भागाः भवन्ति ?

(३) के सत्त्वगुणी ग्रहाः ?

(४) ग्रहाः कदा शुभफलप्रदाः भवन्ति ?

(५) गुरोः शत्रुः कः ?

(६) कति ग्रहाः भवन्ति ?

(७) विंशोत्तरीदशायां कति वर्षाणि भवन्ति ?

(८) धनधान्यवृद्धिः कदा भवति ?

(९) सुखभावस्य अपरं नाम किम् ?

(१०) द्यूनं अर्थात् कः भावः ?

(११) पुत्रविहीनयोगः कदा भवति ?

(१२) मंगलदोषः कदा जायते ?

(१३) परदेशे मृत्युः कदा भवति ?

(१४) ग्रहाणां दीप्ताद्यवस्था कतिविधा ?

(१५) गजकेसरीयोगः कदा भवति ?

----oooo----